# केन्द्रीयसंस्कृतविश्वविद्यालयः

नवदेहली

13-06-2024

# प्रकाशयेम जगत्सर्वम्

## सरलमानकसंस्कृतेन प्रकरणग्रन्थानां रचना करणीया

\- आचार्यः श्रीनिवासः वरखेडी




अद्य प्रकाशनविषयकोपवेशने प्रकाशनकार्यप्रणालीम् अवलोक्य अन्तर्जालमाध्यमेन समुपस्थितान् 433 सङ्ख्याकान् शिक्षकान् चापि उद्दिश्य कुलपतयः स्वाभिप्रायं सभामुखम् उपास्थापयन्। सरलमानकसंस्कृतेन प्रकरणग्रन्थानां रचना करणीया। श्रद्धासाध्यमिदं कार्यं वर्तते। उदाहरणार्थम् - इत्संज्ञाविषये कश्चन विश्वविद्यालयस्य शाब्दिकः सरलमानकसंस्कृतेन लिखति चेत्तर्हि बहवो हि जिज्ञासवः लाभान्विताः भविष्यन्ति। एतादृशः अभिनवप्रयासः आधिक्येन कर्तव्योऽपि । स्वाध्यायः शिक्षा शोधः इत्येतेषु आभ्यन्तरोत्कर्षकारकेषु बद्धादराः शिक्षकाः प्रवचनप्रशिक्षणप्रकाशनेष्वपि अर्थात् बाह्योत्कर्षहेतुष्वपि समादरभावं तत्परतां च अवश्यमेव वहेयुः।

अद्वैते भक्तिः इति सम्प्रत्ययम् आश्रित्य अद्वैतवेदान्तिनः लिखेयुः। प्राचीनालब्धप्रकाशनानां प्रकाशनाय योजनां कुर्युः। मातृकाग्रन्थानां प्रकाशनाय मतिं कुर्युः। उपोद्घातग्रन्थमालान्तर्गतत्वेन अनुत्तमग्रन्थानां प्रकाशनाय तत्परतां प्रदर्शयेयुः। अहं तु वर्षे एकं लेखम् एकं ग्रन्थं व्यस्ततायां सत्यामपि लिखामि। मम व्रतमिदम्। भवन्तः इतः परं पुष्पगुच्छस्य स्थाने ग्रन्थगुच्छेन सर्वान् सत्कुर्वन्तु। छात्रेभ्यः ग्रन्थोपहारः नूनं शक्यते। पुरस्कारप्रतिमायाः स्थाने पुस्तकानि अर्पयन्तु। विमर्शस्य सदस्यताम् अवश्यमेव स्वीकृत्य संस्कृतशोधपत्रिकाः नियतं पठन्तु। एकः शिक्षकः एकः ग्रन्थः इति सङ्कल्पः भवतु भवताम् इति।


केन्द्रीयसंस्कृतविश्वविद्यालयेन इदम्प्रथमतया आयोजिते अस्मिन् उपवेशने प्रकाशनानुभागस्य




निदेशकाः आचार्याः काशीनाथ न्यौपानेवर्याः अवोचन् यत् पञ्चशतं प्राध्यापकाः प्रतिवर्षम् एकैकं ग्रन्थं लिखन्ति, सम्पादयन्ति अथवा गवेषयन्ति चेदपि सहस्रशः ग्रन्थाः एकस्मिन्नेव दशके दृक्पथमवतरन्ति इति। अतः सर्वेऽपि शिक्षकाः रचनात्मककार्येषु प्रकाशनविभागस्य सहयोगं कुर्युः इति। पुनस्ते समेषां स्वागतं व्याहृत्य प्रकाशनविभागस्य अपेक्षाः उपास्थापयन्। शैक्षणिकयोजनायाः संयुक्तनिदेशकः गणेशपण्डितवर्यः प्रकाशनविभागीयप्रगतेः प्रतिवेदनं PPT माध्यमेन सोदाहरणं प्रास्तौत्। Section 8 Company Act अनुगुणं विभागस्य स्तरोन्नयनाय कटिबद्धान् कुलपतीन् कुलसचिवान् च विशेषतः अभ्यनन्दत्।

नवोत्कर्षसमन्वितायाः संस्कृतविमर्शपत्रिकायाः वैशिष्ट्यमधिकृत्य सहायकनिदेशकपदस्था डा. छोटी बाई मीणावर्या अवदत्। कुलपतिप्रमुखैः संस्कृतविमर्शस्य लोकार्पणं कृतम् । शैक्षणिकवृत्तस्य अधिष्ठातारः प्रो. बनमाली बिश्वालवर्याः अन्ये शिक्षकाः साद्यन्तं सहयोगम् अकुर्वन्। अस्मिन् एव सन्दर्भे प्रो. सुज्ञानकुमारमाहान्तिवर्यैः सम्पादितस्य त्रिपाठीवर्यैः लिखितस्य च ज्ञानसिन्धुः इत्येतस्य सत्काव्यसङ्ग्रहस्य लोकार्पणमपि कुलपतिप्रमुखैः सभामुखं कृतम्।

प्रकाशकस्थानीयैः कुलसचिवैः प्रकाशकभणितिप्रसङ्गे प्रोक्तं यत् - 1970 तमे संवत्सरे स्थापनोत्तरे च आद्ये उपवेशने एव शतं ग्रन्थाः विविधज्ञानविज्ञानसमन्विताः सरणिरूपेण संस्थाननामकं केन्द्रीयसंस्कृतविद्यापीठमिदं प्रकाशयेत् इति निर्णयः कृतः आसीत्। वयम् अधुना वा स्थापनोद्देश्यानि पूर्णशः सफलीकर्तुं कार्यप्रवृत्ताः भवेम इति। प्रकाशनविभागस्य संयुक्तनिदेशकः डा.पवनव्यासवर्यः सुष्ठु सञ्चालनम् अकरोत्। अन्ते सर्वेभ्यः धन्यवादान् समार्पयत् अपि। आयुष्मता गोपालकृष्णेन वैदिकघोषः कृतः । कुलगीतेन आरब्धमिदं राष्ट्रगानेन सुसम्पन्नम्।





## सहयोगिनः

कुलपतिकार्यालयीयाः

कुलसचिवकार्यालयीयाः

श्री मनोजमिश्रः

श्री राहुलकश्यपः

श्री निखिलः

श्री विनय शुक्लः

श्री श्रीशः समीरः के.एस्